# Daridraya Dahana Stotram Lyrics in Sanskrit and Hindi

**विश्वेश्वराय नरकार्णव तारणाय कर्णामृताय शशिशेखरधारणाय ।**
**कर्पूरकान्तिधवलाय जटाधराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ १॥**
Vishveshvaraya Narakarnava Taranaya
Karnamrutaya Shashishekhara Dharanaya
Karpurakantidhavalaya Jatadharaya
Daridraya Dukha Dahanaya Namah Shivaya

**गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिपकङ्कणाय ।**
**गंगाधराय गजराजविमर्दनाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ २॥**
Gauripriyaya Rajanishakaladharaya
Kalantakaya Bhujagadhipatankanaya
Gangadharaya Gajarajavimardanaya
Daridrya Dukhadahanaya Namah Shivaya

**भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ।**
**ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ३॥**
Bhaktipriyaya Bhavarogabhayapahaya
Ugraya Durgabhavasagarataranaya
Jyotirmayaya Gunanamasunutyakaya
Daridraya Dukhadahanaya Namah Shivaya

**चर्मम्बराय शवभस्मविलेपनाय भालेक्षणाय मणिकुण्डलमण्डिताय ।**
**मंझीरपादयुगलाय जटाधराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ४॥**
Charmambaraya Shavabhasmavilepanaya
Bhalekshanaya Manikundala Manditaya
Manjirapadayugalaya Jatadharaya
Daridraya Dukhadahanaya Namah Shivaya

**पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डिताय ।**
**आनन्दभूमिवरदाय तमोमयाय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ५॥**
Panchananaya Phaniraja Vibhushanaya
Hemamshukaya Bhuvanatrayamanditaya
Anandabhumivaradaya Tamomayaya
Daridraya Dukhadahanaya Namah Shivaya

eAstroHelp
Your Astrology Helpline

**भानुप्रियाय भवसागरतारणाय कालान्तकाय कमलासनपूजिताय ।**
**नेत्रत्रयाय शुभलक्षण लक्षिताय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ६॥**

Bhanupriyaya Bhavasagarataranaya
Kalantakaya Kamalasanapujitaya
Netratrayaya Shubhalakshana Lakshitaya
Daridrya Duhkhadahanaya Namah Shivaya

**रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नरकार्णवतारणाय ।**
**पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ७॥**

Ramapriyaya Raghunathavarapradaya
Nagapriyaya Narakarnavataranaya
Punyeshu Punyabharitaya Surarchitaya
Daridraya Dukha Dahanaya Namah Shivaya

**मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय ।**
**मातङ्गचर्मवसनाय महेश्वराय दारिद्र्य दुःखदहनाय नमः शिवाय ॥ ८॥**

Mukteshwaraya Phaladaya Ganeshwaraya
Gitapriyaya Vrushabheshwara Vahanaya
Matangacharmavasanaya Maheshwaraya
Daridraya Dukhadahanaya Namah Shivaya

**वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणं ।**
**सर्वसम्पत्करं शीघ्रं पुत्रपौत्रादिवर्धनम् ।**
**त्रिसंध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥ ९॥**

Vasishtena Krutham Stotram
Sarva Sampathkaram Param
Trisandhyam Ya Padenithyam
Sa Hi Swargamavapnyuth

eAstroHelp
Your Astrology Helpline